ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगडीविश्वविद्यालयस्य मासिक पत्रिका]

आश्विनः २०३०, अक्टूबर १९७३, वर्षम्-२६, अङ्कः २, पूर्णाङ्कः २९८

श्रुति सुधा

यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीं रकृणोदुस्रियाणाम् ॥

ऋ. १०।६८।६

वह बृहस्पति आचार्य (यदा) जब (अग्नितपोभिः) अग्नि के समान परितप्त अथवा अग्नि से तप्त (अर्कैः) अर्कों से (पीयतः वलस्य) हिंसक वलासुर के (जसुं भेत्) हिंसकरूप को भेदन कर देता है और (न) जिस प्रकार (जिह्वा) जीभ (परिविष्टं) मुखावृत ग्रास को (दद्भिः आदत्) दांतों से भक्षण कर लेती है। उसी प्रकार जब उस बलासुर को भक्षण कर लिया जाता है तब वह बृहस्पति (उस्रियाणां निधीन्) दिव्यशक्तियों की निधियों को (आविः अकृणोत्) प्रकाश में ला देता है।

बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत ॥

ऋ. १०।६८।७

वह बृहस्पति (स्वरीणां आसाम्) शब्द करती हुई इन दिव्यशक्तियों के (त्यत् नाम) उस नाम को (हि) निश्चय से (अमत) जान लेता है (यत्) जो कि (सदने) वलासुर के सदन में (गुहा) गुफा में निहित है (इव) जिस प्रकार (शकुनस्य गर्भं) पक्षी का गर्भ (आण्डा भित्वा) अण्डे को फोड़कर बाहर निकल आता है उसी प्रकार (उस्रियाः) ये दिव्य किरणें (पर्वतस्य) वासना के पर्वत का भेदन कर (त्मना उत् आजत्) अपने आप बाहर निकल आती है।

सूत्राणामुद्धरणानि

श्री उदयवीर शास्त्री

यद्यपि कस्यचिद् ग्रन्थस्य ग्रन्थान्तरेष्वनुद्धारस्तस्य तदानीमसत्त्वे न सुपुष्टं प्रमाणम्। विद्यमाना अपि ग्रन्थाः स्वविषयेषु समानविषयेष्वपि वा ग्रन्थान्तरेष्ववश्यमुद्ध्रियेरन्निति नास्ति नियमः। सांख्यसूत्रव्याख्यायामनिरुद्धकृतायां सांख्यसप्तत्या एकाप्यार्या नोद्धृता वर्त्तते क्वचित्। नैतावताऽनिरुद्धप्राक्काले ऽसत्त्वं सांख्यसप्तत्याः शक्यं साधयितुम्। एवं ऋग्वेदस्य सायणभाष्ये तत्प्राक्कालिकानां स्कन्दस्वामिप्रभृतीनां भाष्यकाराणां क्वाप्युल्लेखो नास्ति, किमेतेन स्कन्दस्वाम्यादीनां वेदभाष्यकाराणां सायणप्राक्कालिकत्वं शक्यतेऽपलपितुम्? यथा नैतत् संभवति, तथैव सायणशङ्करादिग्रन्थेषु सांख्यसूत्रोद्धाराऽभावेऽपि सूत्राणां सायणशङ्कराद्यर्वाक्कालिकत्वं न संभवत्येव। यद्यपि सायणशङ्करादिग्रन्थेष्वपि सांख्यसूत्राण्युद्धृतान्यवलोक्यन्त इत्यनुपदमेवावगतं भविष्यति।

साम्प्रतं कानिचित् सांख्यसूत्राणि विस्तृते वाङ्मये समुद्धृतान्यत्र प्रस्तूयन्ते——

१——सूतसंहिताव्याख्याकारो विद्यारण्यो माधवमन्त्री सायणानुजः (४०७ पृष्ठे)१ एवं निर्दिशति——

"अत एव सांख्यैरुच्यते—"सत्त्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिः' इति।" सांख्यसूत्रं 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इत्यानुपूर्वीकमुपलभ्यते। एषा ह्यानुपूर्वी सन्दर्भस्य सांख्यसूत्रमन्तरा क्वाप्यन्यत्र सांख्यग्रन्थे नोपलभ्यते। तस्मात्तन्मूलैव विद्यारण्यस्य पंक्तिरिति निश्चीयते।

सर्वदर्शनसंग्रहेऽप्येवं निर्देशः——

"· · · प्रकृतिरिति · · · सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात्।"

२—नैषधीयचरितव्याख्यायां (१।५६) मल्लिनाथो निर्दिशति——

"अणुपरिमाणं मनः इति सूत्रणात्।"

अत्र 'सूत्रणात्' इति पदं पूर्वसन्दर्भस्य सूत्रतां स्पष्टीकरोति। सूत्रञ्च तत् कस्यचिद्दर्शनस्यैव संभवति। अत्र सांख्यसूत्रं (३।१४) संगमनीयम्। सूत्रं 'अणुपरिमाणं तत्' इत्यानुपूर्वीकमुपलभ्यते। सूत्रे 'तत्' इति सर्वनामपदं प्रसङ्गानुगत 'मनस्' पदमाकर्षति। परं टीकायां तादृशप्रसंगाभावात् मल्लिनाथः 'तत्' पदस्थाने अभिवाञ्छित 'मनस्' इति नामपदमेव प्रायुङ्क्त स्पष्टप्रतिपत्तये। एवं सांख्यसूत्रमेव मल्लिनाथः समुद्दध्र इति निश्चयः।

३—न्यायकुसुमाञ्जलिव्याख्याकारो वर्धमानः प्रथमस्तबक एव समुल्लिखति——

"प्रकृतेर्महान् महतोऽहङ्कारः तस्मात् पञ्चतन्मात्राणि-इति सांख्याः।"

एषा उद्धरणानुपूर्वी सांख्यसूत्रेण (१।६१) संगता भवति। कारिकासु नेयमानुपूर्वी सर्वांशत उपलभ्यते।

४—अमरकोषव्याख्याता क्षीरस्वामी कालवर्गस्यैकोनत्रिंशत्तमश्लोकव्याख्यायामेवं लिखति "आरम्भात् क्रियतेऽनया प्रकृतिः—सत्त्वरजस्तमसां साम्यावस्था अव्यक्ताख्या",

क्षीरस्वामिनिर्दिष्टं प्रकृतिस्वरूपं षडध्याय्याः सूत्रं (१।६१) अनुसरति। प्रकृतिस्वरूपनिरूपिका एषा पदानुपूर्वी नान्यत्र क्वापि सांख्यग्रन्थे समुपल-

———————

१. इयं पृष्ठसंख्या मद्राससंस्करणमनुसरति।

भ्यते। सायणात् प्राग्वर्त्ती क्षीरस्वामी, इति सर्वसम्मतम्।

५—सिद्धर्षिरार्हतो विद्वान् स्वरचनायां उपमितिभवप्रपञ्चाकथायां विविधदार्शनिकमतप्रदर्शनावसरे सांख्यमतसमुल्लेखे षडध्यायी सूत्रं (१।६१) इत्थं सन्निहितं वर्त्तते—

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। प्रकृतेः महान् बुद्धिरित्यर्थः। बुद्धेश्चाहंकारः। अहंकारादेकादशेन्द्रियाणि पञ्चतन्मात्राणि तेभ्यः पञ्च महाभूतानि।"

षडध्यायीसूत्रं (१।६१) खल्वित्थं प्रवर्त्तते—"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। प्रकृतेर्महान्। महतोऽहंकारः। अहंकारात् पञ्चतन्मात्राणि, उभयमिन्द्रियम्। तन्मात्रेभ्यः स्थूलभूतानि पुरुषः।"

सिद्धर्षिसन्दर्भः षडध्यायीसूत्रोपजीव्य इत्यनेन सन्तुलनेन निश्चीयते। 'हिस्ट्री आफ संस्कृत लिट्रेचर' इति नाम्निग्रन्थे (४८९)तमे पृष्ठे 'उपमितिभवप्रपञ्चाकथायामुद्धृतानि सांख्यसूत्राणि षडध्याय्यां नोपलभन्ते' इति सर्वथाऽप्यसत्यं निर्दिशन् कीथः कथं न तत्रप इत्याश्चर्यमावहति। स्वकालं स्वयं निरदिशत् सिद्धर्षिः—'संवत्सरशतनवके द्विषष्टिसहितेऽतिलंघिते चास्याः। ज्येष्ठे सितपञ्चम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत्।' (९६२ वि०। ९०४ खृ०) अयं कालः सायणकालादनेकशतीपूर्वः। तदानीं सांख्यसूत्राणां विद्यमानता निश्चिता भवति।

६—भर्तृहरिप्रणीतस्य वाक्यपदीयस्य हेलाराजीयटीकायां आत्मस्वरूपनिरूपणप्रसंगेनाभिहितम्—"आत्मा वा चैतन्यम्, यथाहुः सांख्याः—'निर्गुणत्वान्न चिद्धर्मा' इति।"

'निर्गुणत्वान्न चिद्धर्मा' इति सांख्यषडध्यायीसूत्रम्[1] (१।१४६) हेलाराजस्य कालः साम्प्रतिकैरैतिहासिकैरेकादशशतके वैक्रमेऽङ्गीक्रियते। सायणकालादयं कालोऽतिपूर्वः।

७—एवं बोधिचर्यावतारपञ्जिकाकारटीकायां 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इत्यादिसांख्यसूत्रं[2] (१।६१) समुद्धृतं वर्त्तते। ग्रन्थोऽयं वैक्रमे दशमशतके प्रणीत इति आधुनिकाः पुरावृत्तविदो मन्यन्ते। एतेनापि सांख्यसूत्राणां सायणात् प्राक्कालिकत्वं निश्चितं भवति।

अयं कालः सायणकालादनेकशतीपूर्वः। तदानीं सांख्यसूत्राणां विद्यमानता निश्चिता भवति।

८—शैवाचार्यः श्रीकण्ठो वेदान्तसूत्र (२।२।१) भाष्ये निर्दिशति—

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः—इत्यङ्गीकारात्।"

श्रीकण्ठः सांख्यसूत्र (१।६१) मेव समुद्दध्र इति अन्त्यपदेन निश्चीयते।

९—सांख्यसप्ततिव्याख्याता गौडपादः स्थलद्वये (का० १९,२५) निर्दिशति—

"सत्त्वरजस्तमसां साम्यावस्था प्रधानम्।"
"प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था।"

अयं निर्देशः षडध्यायीसूत्रं (१।६१) अनुसरति।

१०—हरिभद्रसूरिः षडदर्शनसमुच्चये लिखति—"सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम्। एतेषां या समावस्था सा प्रकृतिः किलोच्यते।" पद्यमिदं सूरिः षडध्यायीसूत्रं (१।६१) आधारीकृत्य समुल्लिलेख, इति पदानुवृत्या स्फुटं विज्ञायते।

---

१. अस्मत्प्रणीते सांख्यभाष्यग्रन्थे सूत्रमिदं (१।१११) संख्यायां द्रष्टव्यम्।
२. इदमपि सूत्रमस्मत्प्रणीते सांख्यभाष्यग्रन्थे (१।२६) संख्यायां द्रष्टुं शक्यते।

श्रीकण्ठ-गौडपाद हरिभद्राः स्त्रीस्टनवमशतकात् पूर्ववर्त्तिन एवाचार्या इत्यत्र नास्ति काचिद् विमतिः ।

११—वहुलमुद्घोष्यते किल, शङ्कराचार्यो नैतानि सूत्राणि क्वचित् समस्मरत् । तदपीदानीं सावधानमवलोक्यताम् ।

क—ब्रह्मसूत्र (२।१।२६) भाष्ये शङ्करः समुल्लिखति—

"ननु नैव तैः (सांख्यैः) निरवयवं प्रधानमभ्युपगम्यते, सत्त्वरजस्तमांसि त्रयो गुणा नित्यास्तेषां साम्यावस्था प्रधानं तैरेवावयवैस्तत् सावयवमिति ।"

अत्र सन्दर्भे 'अभ्युपगम्यते' इति क्रियापदं तेषां सांख्यानां कमप्यभ्युपगमं सिद्धान्तं कञ्चिन्निर्दिशति। स चाभ्युपगमो भाष्येऽग्रिमपदैरेवं निरूप्यते- 'सत्त्वरजस्तमांसि त्रयोगुणास्तेषां साम्यावस्था प्रधानम्।' तदेतदभ्युपगमस्रोतः सांख्यसूत्रं (१।६१) संभवति नान्यत् । यदि शङ्करकाले सूत्राणि नासन्, तदा किंमूलमाश्रित्य सांख्यानामिमभ्युपगमं शङ्करोनिरदिशत् ? सांख्यसप्तत्यामन्यस्मिन् वा सांख्यग्रन्थे क्वाप्यस्य मूलं नोपलभ्यते ।

ख—सूत्रञ्चापि सांख्यषडध्याय्याः शाङ्करभाष्ये समुद्धृतं वर्त्तते । 'न वायुक्रिये पृथगुपदेशात्' (२।४।९) इति सूत्रभाष्ये शङ्करः समुल्लिखति- "अथवा तन्त्रान्तरीयाभिप्रायात् समस्तकरणवृत्तिः प्राण इति प्राप्तम् । एवं हि तन्त्रान्तरीया आचक्षते-'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च' इति ।"

अस्मिन् सन्दर्भे 'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च' इति सांख्यषडध्याय्याः द्वितीयाध्यायान्तर्गतं एकत्रिंशत्तमं सूत्रम् ।

नेदं वाच्यम्—भाष्यसन्दर्भोऽयं सांख्यसप्तत्याः एकोनत्रिंशत्तमकारिकाया उत्तरार्द्ध एव । यतः समुद्धृतानुपूर्वीकः सन्दर्भो नार्याच्छन्दोरूपः । 'सामान्या करणवृत्तिः' इत्याद्ययोर्द्वयो पदयोः समासे सत्येव सन्दर्भस्यार्यारूपत्वमायाति । सर्वेष्वप्यद्यावधि प्रकाशितेषु शांकरभाष्य संस्करणेषु प्रमाणभूतेष्वाद्यपदयोरसमस्त एव पाठः । एतेन शंकरकाले सूत्रस्यायमेव पाठ आसीत् इति निश्चीयते । यद्यपि शंकरकालात् प्रागेव सांख्यसप्ततिकार ईश्वरकृष्णः सूत्रपाठमाद्यपदयोः समासं विधाय कारिकारूपतां नीतवान्, तथाप्याचार्यः शंकरोऽत्र सूत्रमेवोद्दधार, न कारिकाम् । अनन्तरं सांख्यसप्तत्यध्ययनपरम्परापराभूतैरध्येतृभिः सूत्रपाठोऽपि कारिकाभ्यास वशात् कारिकारूपतां नीतः । स एवाद्य मुद्रितपुस्तकेषु अवलोक्यते । वास्तविकः सूत्रपाठोऽद्यापि ब्रह्मसूत्रशांकरभाष्ये सुरक्षितो वर्त्तते ।

परमेतदतीव कष्टावहं त्रपाकरञ्च तेषां कृते ये यथाभूतपाठस्य महत्त्वमजानन्तो हिन्दीभाषानुवादसहितेषु शांकरभाष्यसंस्करणेषु बाल्यात्सांख्यसप्ततिपाठाऽभ्यासमारूढाः कारिकारूपत्वेन सूत्रपाठमधुना विकृतवन्तः । एवं शंकरकाले सांख्यषडध्यायीसूत्राण्यासन्निति निश्चितं भवति ।

१२—न्यायवात्स्यायनभाष्यस्य वार्तिककार उद्योतकरो न्यायसूत्र (४।१।२१) वार्तिके निर्दिशति—

"यदा भवन्तः—सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति ।"

उद्योतकरः सांख्यसिद्धान्तं प्रत्याचिख्यासुरेतन्निर्दिशति । 'भवन्तः' 'वर्णयन्ति' इत्यनयोः पदयोर्मध्ये पठितः सन्दर्भः सांख्यग्रन्थस्यैव संभाव्यते । अयञ्च सांख्यषडध्यायीसूत्रस्य (१।६१) आद्यभाग एव । उद्योतकरश्च सायणाद्याचार्येभ्योऽतीव प्राचीनः ।

सांख्यसप्तत्याः प्राक्कालिके वाङ्मये सांख्यसूत्राणि

पूर्वोक्तानि सांख्यसूत्रोद्धरणानि सायणेश्वरकृष्णयोरन्तरालकालभवानामाचार्याणां ग्रन्थेषु प्रदर्शितानि। तत्र तत्र खल्वेतदपि प्रदर्शितम्-कस्मात् कारणात् सांख्यसूत्रस्यैवेदमुद्धरणं नार्याया इति। सप्तत्याः प्राक्कालिके वाङ्मये समुद्धृतानां सूत्राणां विषये कारिकाभिः सह सन्तुलनस्य प्रश्न एव नोदेति।

१३–गौतमीयन्यायसूत्रभाष्यकारो वात्स्यायनमुनिः (४।१।४८) सूत्रभाष्ये सांख्याभिमतं सत्कार्यसिद्धान्तमुपपादयन्निर्दिशति—

"प्राङ्निष्पत्तेर्निष्पत्तिधर्मकं नाऽसत्–उपादाननियमात्।"

अत्र भाष्यकारः सत्कार्यवादसिद्धौ 'उपादाननियमात्' इति हेतुं प्रस्तौति। सांख्यषडध्याय्यां सत्कार्यवादप्रतिपादनप्रसंगे (१।११५) सर्वप्रथमोऽयं हेतुः–'उपादाननियमात्' इति। हेतोरियमानुपूर्वी सूत्रस्यैव, नार्यायाः। आर्यायां (९) 'उपादानग्रहणात्' इति पाठः। वात्स्यायनकाले सांख्यसप्ततिर्नासीदेव। निर्बाधमेतत् सांख्यसूत्रस्यैवोद्धरणम्।

१४–किञ्च (५।२।६) सूत्रव्याख्यानावसरे वात्स्यायनो हेत्वन्तरनिग्रहस्थानोदाहरणाय सांख्यीयं हेतुद्वयमुद्धरति–'परिमाणात्, समन्वयात्' इति। एतौ हेतू व्यक्तमात्रस्य सत्त्वरजस्तमोरूपायाः प्रकृतेरेवोत्पत्तिरस्तीत्युपपत्तये–सांख्यषडध्याय्यां (१।१३०-३१) निर्दिष्टौ। नैतयोर्हेत्वोर्ग्रहणं कारिकातः (१५) संभवति, वात्स्यायनकाले कारिकाणामसत्वात्।

१५–सुश्रुतसंहितायाः शारीरस्थाने प्रथमाध्याये शरीररचनाप्रसंगेन कानिचित्तत्वानि सांख्यसिद्धान्तानुसारं संहिताकारः प्रत्यपादयत्। तत्रेत्थं पाठः प्रवर्त्तते—

"सर्वभूतानां कारणमकारणं **सत्त्वरजस्तमोलक्षणं** ··· **अव्यक्तं** नाम। **अव्यक्तान्महानुत्पद्यते** तल्लिङ्ग एव, तल्लिङ्गाच्च **महतस्तल्लक्षण एवाऽहंकार** उत्पद्यते, स तु त्रिविधो वैकारिकस्तैजसो भूतादिरिति। तत्र **वैकारिकादहंकारात्** तैजससहायात् तल्लक्षणान्येव **एकादशेन्द्रियाणि** उत्पद्यन्ते ···· भूतादेरपि तैजससहायात् तल्लक्षणान्येव **पञ्चतन्मात्राण्युत्पद्यन्ते,** तेभ्यो भूतानि सर्व एवाचेतन एष वर्गः, **पुरुषः पञ्चविंशतितमः।**"

एष पाठः संहितायास्तृतीयसूत्रमारभ्याष्टमसूत्रपर्यन्तमन्तर्भवति। अत्र सांख्यसूत्रमूलपदानि सव्याख्यमुद्धृतानीव प्रतिभान्ति। कृष्णाक्षरे लिखितानि पदानि समाकलय्य एष पाठः सम्मुखमायाति—

"सत्त्वरजस्तमोलक्षणमव्यक्तम्, अव्यक्तान्महान्, महतोऽहङ्कारः, अहंकारात् एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, तेभ्यो भूतानि, पुरुषः पञ्चविंशतितमः।"

संकलितेऽस्मिन् सुश्रुतसन्दर्भे सांख्यसूत्रे (१।६१) चातितरां सादृश्यमुपलभ्यते। सूत्रानुपूर्वी खल्वित्थं प्रवर्त्तते—

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहंकारः, अहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं, तन्मात्रेभ्यः स्थूलभूतानि, पुरुषः इति पञ्चविंशतिर्गणः।"

अनयोः सन्दर्भयोश्चमत्कारपूर्णं सादृश्यं निश्चाययति, संहिताकारस्य बुद्धौ प्रस्तुतसन्दर्भलेखनावसरे सांख्यसूत्रं (१।६१) सुविचारितं सन्निहितमासीत्। एतेन सुश्रुतसंहितायाः प्राक्काले सांख्यसूत्राणामवस्थितिर्निश्चिता भवति।

१६—सुश्रुतसंहिताया अस्मिन्नेव प्रकरणे अन्यान्यपि सांख्यसूत्राणि समुद्धृतान्यवलोक्यन्ते। चतुर्थे सन्दर्भे 'उभयात्मकं मनः' इति मनःस्वरूपमुद्दिष्टम्। तदेतत् सांख्यसूत्रं (२।२६) एव।

१७—अस्मिन्नेव प्रसंगेऽष्टमे सन्दर्भे संहिता-पाठ एवं प्रवर्त्तते—

"सत्यप्यचैतन्ये प्रधानस्य पुरुषकैवल्यार्थं प्रवृत्ति-मुपदिशन्ति क्षीरादींश्चात्र हेतूनुदाहरन्ति ।"

अत्र 'उपदिशन्ति, उदाहरन्ति' इति क्रियापद-प्रयोगेण केचिदुपदेष्टार उदाहर्त्तारो वा ग्रन्थकर्त्तार एव अभिप्रेयन्ते । कस्मिन् ग्रन्थे सर्वमेतदुपदिष्ट-मुदाहृतं वेत्यन्विष्यमाणे सांख्यषडध्यायीग्रन्थ एव तादृशः सम्मुखमेति । तत्रेदं सूत्रमुक्तार्थबोधक-मुपलभ्यते—

"अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य ।" (३।५६)

नायं सुश्रुतसन्दर्भः सांख्यसप्तत्युपजीव्यः कल्पयितुं शक्यः । सुश्रुतरचनाकाले सांख्यसप्तति-सत्वाभावात् ।

किञ्चास्मिन्नेव प्रकरणे तत्त्वसमासस्यापि सूत्रद्वयं 'अष्टौ प्रकृतयः, षोडश विकारा' इति समुद्धृतमवलोक्यते ।

एतेन सांख्यषडध्यायीसूत्राणां तत्त्वसमास-सूत्राणाञ्च सुश्रुतरचनाकालात् प्राक्तनत्वं सुतरां स्पष्टं भवति । अयं कालः सायणादिकाला-दतिप्राचीनः ।

१८—ब्रह्मसूत्र (१।४।२८) भाष्ये शंकरा-चार्यः सांख्यसिद्धान्तं प्रत्याख्यातुकामस्तस्य प्रकर्षं पुरस्तादुपपादयन्नेवं निर्दिदेश—"प्रधानकारणवादः · · · · देवलप्रभृतिभिश्च कैश्चिद्धर्मसूत्रकारैः स्वग्रन्थेष्वाश्रितः । तेन तत्प्रतिषेधे यत्नोऽतीव कृतः ।" इति ।

देवलधर्मसूत्रग्रन्थः साकल्येन साम्प्रतं नोप-लभ्यते । परमपरादित्यप्रणीतायां याज्ञवल्क्य-स्मृतिव्याख्यायां प्रायश्चित्तप्रकरणे नवोत्तरैकशत (१०६) श्लोकव्याख्यानावसरे देवलनाम्ना समुद्धृतोऽयं ग्रन्थभाग उपलभ्यते—

"तत्र देवलः—पञ्चविंशतितत्त्वज्ञानं सांख्यम् । · · · · एतौ सांख्ययोगौ चाधिकृत्य यैर्युक्तितः समयतश्च पूर्वप्रणीतानि विशालानि गम्भीराणि इह संक्षिप्योद्देशतो वक्ष्यन्ते—

तत्र सांख्यानामेका मूलप्रकृतिः । · · · षोडश विकाराः । त्रयोदश करणानि । · · · पञ्च वायु-विशेषाः । त्रयो गुणाः । त्रिविधो बन्धः । त्रीणि प्रमाणानि । त्रिविधं दुःखम् । विपर्ययः पञ्चविधः । अशक्तिरष्टाविंशतिधा । तुष्टिर्नवधा । सिद्धि-रष्टधा । प्रत्ययभेदाः पञ्चाशत् । · · · · इति दश मूलिकार्थाः । · · · · प्रकृतेर्महानुत्पद्यते, महतो-ऽहङ्कारः, अहंकारात् तन्मात्राणीन्द्रियाणि च, तन्मात्रेभ्यो विशेषा इत्युत्पत्तिक्रमः ।"

लेखेनानेन प्रतीयते—देवलकाले सांख्यस्य विशाला गम्भीराश्च ग्रन्था विद्यमाना आसन् । संक्षिप्य तान् देवलः केवलं सांख्यसिद्धान्तान् उद्देशत एवोल्लिलेख । संभाव्यते—संक्षेपकरणे देवलस्तथा प्रायतत, यथा मूलग्रन्थाक्षराण्येव संक्षेपे बाहुल्येन निर्दिश्येरन् । तथा च कानिचित् सूत्राणि समानानुपूर्वीकाणि कानिचिच्चांशेनान्यथाभूतानि सन्दर्भेऽस्मिन् सन्निविष्टानि सन्ति । तथाहि समानानुपूर्वीकाणि तत्त्वसमाससूत्राणि—

(१) षोडश विकाराः ।।२।।
(२) दश मूलिकार्थाः ।।१६।।
(३) त्रिविधो बन्धः ।।१६।।
(४) त्रिविधं दुःखम् ।।२२।।

अंशमात्रेणान्यथानुपूर्वीकाणि समानार्थकानि तत्त्वसमाससूत्राणि कानिचिन्निम्नलिखितानि—

तत्त्वसमासः	देवलः
(१) त्रैगुण्यम् ।।४।।	त्रयो गुणाः ।
(२) त्रिविधंप्रमाणम् ।।२१।।	त्रीणि प्रमाणानि ।
(३) पञ्चवायवः ।।१०।।	पञ्चवायुविशेषाः।

समानानुपूर्वीकाणि सांख्यषडध्यायीसूत्राणि–

(१) अशक्तिरष्टाविंशतिधा ।।३।३८।।

(२) तुष्टिर्नवधा ।।३ ३९।।

(३) सिद्धिरष्टधा ।।३।४०।।

तत्त्वसमासे तु सूत्राणामेषां विपर्यस्तः पाठः–

(१) अष्टाविंशतिधाऽशक्तिः

(२) नवधा तुष्टिः ।

(३) अष्टधा सिद्धिः ।

अंशेनान्यथानुपूर्वीकाणि कानिचित् षडध्यायी-सूत्राणि देवलसन्दर्भे सन्निविष्टानीत्थम्––

सांख्यषडध्यायीसूत्रम्ः––

(१) विपर्ययभेदाः **पञ्च** ।।३।३७।।

(२) करणं त्रयोदशविधम् ।।२।३८।।

(३) प्रकृतेर्महान् महतोऽहंकारः, अहंकारात् पञ्चतन्मात्राणि, उभयमिन्द्रियम्, तन्मात्रेभ्यः स्थूल-भूतानि ।।१।६१।।

(४) अध्यवसायो बुद्धिः ।।२।१३।।

(५) अभिमानोऽहंकारः ।।२।१६।।

देवलपाठः––

(१) विपर्ययः पञ्चविधः ।

(२) त्रयोदश करणानि ।

(३) प्रकृतेर्महानुत्पद्यते, ततोऽहंकारः, अहं-कारात्तन्मात्राणीन्द्रियाणि च तन्मात्रे-भ्यो विशेषाः ।

(४) अध्यवसायलक्षणो महान् बुद्धिः ।

(५) अभिमानलक्षणोऽहंकारः ।

एवञ्च––अपरादित्यकृतायां याज्ञवल्क्यस्मृति-व्याख्यायां समुद्धृतस्य देवलग्रन्थस्यापेक्षित एवांशोऽत्र प्रदर्शितः । शेषभागोऽपि सूत्रव्याख्यात्मक एवाभातीति तुलनायामुपेक्षितः । एतेन देवलकाले सांख्यषडध्यायीग्रन्थो विद्यमान आसीदिति स्पष्टं भवति ।

नैतद् वक्तव्यम्––सांख्यसूत्रकार एव देवल-ग्रन्थात् सूत्राणीमानि स्वग्रन्थेऽपजहार–इति । देवल. साक्षात् 'सांख्ययोगौ चाधिकृत्य यैर्युक्तितः समयतश्च पूर्वं प्रणीतानि विशालानि गम्भीराणि तन्त्राणि, इह संक्षिप्योद्देशतो वक्ष्यन्ते ? इति निर्दिशन् प्रमाणयति–सांख्यविषयकं यदिहोक्तम्, तत्सर्वं पूर्वप्रणीततन्त्रोपजीव्यमेव संक्षेपेणोद्देशमात्रेण च प्रतिपादितम् । 'तन्त्र' पदप्रयोगश्चात्र कापिलं 'षष्टितन्त्रम्' एव संकेतयतीति प्रतीमः ।

प्रकरणेऽस्मिन् प्राक्तनभारतीयवाङ्मयसमुद्धृतानि कानिचित् षडध्यायीसूत्राणि संगृह्य प्रदर्शितानि । सर्वाण्यपि तानि समुद्धरणानि सायणकालात् प्राक्तनानि, कानिचिदेव समकालिकानि । कानिचित्तु वाचस्पतीश्वरकृष्णशंकराचार्य-कालादपि प्राचीनानि । एतेन सांख्यसूत्राणां षडध्यायात्मकानां रचनाऽतिप्राचीना इति स्पष्टं भवति । सा च कापिली एवेति प्रकरणान्तरेण भूयो व्युत्पाद्यते ।

(क्रमशः)

विश्व-विख्यातो वर्णकर्मा पाब्लो पिकासो महाशयः

विद्याभूषणः श्री गणेशराम शर्मा

जानन्त्येव पाठकमहोदया यद्धि पाब्लोपिकासोमहाशयोऽधुनातनयुगीनो महान् हि चित्रकारोऽभूदिति । अस्य जन्म २५ आॅक्टूबर, सन् १८८१ दिने स्पेनदेशस्य दक्षिणे तटे संस्थिते मलागानाम्नि किलैकस्मिन् ग्रामे बभूव । जन्मतः सप्ताहद्वयादनन्तरं पिकासोमहाशयस्य नामकरणं व्यधीयतः— पाब्लो दियेगोजोस फ्रांसिस्कोटे पालाजुभ्यान नेपोमुसेनो मारिया देलो रेमेदियोश्र सिप्रियानोदेलां सान्तिसिमा ट्रिनिडाड इति सुदीर्घं तदभिधानं विहितम् । स्वायुष एकविंशतिवर्षेभ्योऽनन्तरं सन् १६२० वर्षे स हि स्वात्मनोऽभिधानस्य दीर्घाक्षरायाः सूच्याः सर्वाः संज्ञा अपाकृत्य 'पिकासो' इति स्वहस्ताक्षराणि लिखितवान् ।

स्पेनदेशः पिकासोमहाशयस्य जन्मभूमिरासीत्तथा च फ्रांसदेशस्तस्य कर्मभूमिरभूत् । पिकासो महोदयः स्वकीयां कलाविकाशयात्रां पेरिसनगरतः प्रारेभे तथा च स्पेनदेशं प्रायेण तत्याज । गच्छति काले जनरल फ्रैंकोमहाशयस्य निरङ्कुशतायाः स्वेच्छाचाराच्च विरोधे स खलु स्पेनदेशमौपचारिकरूपेणापि परित्यक्तवान् ।

पिकासोमहोदयः खल्वेकमात्रं कलाकारोऽभूद्यस्य जन्मना सार्द्धमेव विवादः संयुक्तस्तस्थौ । केभ्यश्चित् प्रारम्भिकेभ्यश्चित्रेभ्योऽनन्तरं यदा सन् १६०७ वर्षे स 'लदेमाजेलसद अविनोन' इत्यस्य रचनामकार्षीत् तदा यूरोपभूभागस्य कलाजगति तथाविधैका क्रान्तिः समभूद्यादृशी कस्यापि कलाकारस्य रचनामधिकृत्य न बभूव । चित्रेऽस्मिन् पिकासो काश्चन नग्नाः स्त्रिय आलिलेख यासां त्रिभुजाकाराणि शरीराणि खण्डशो विभक्तान्यासन् यथा तानि प्लास्टर आफ पैरिस इत्यनेन सह संयोजितानीवासन् । तासामाकृतयः कृतमुखा ...... नेत्राणि च विस्फारितान्यभूवन् । दर्शकानां तथा कलासमीक्षकानां खेदस्य कारणमेतन्नासीद्यत् पिकासो चित्रेऽस्मिन् वार्सेलेनानगरस्य वैश्याश्चित्रितवान्, वरं च कारणमिदमभूद्यत् पिकासोमहाशयः कलाया इदानींयावत् प्रचलितान् सर्वांश्चापि नियमान् बभञ्जेति । स्त्रीशरीरस्य कल्पनां प्रकारेणानेनाधुनापर्यन्तं न कोऽपि च चित्रकारः कृतवानभूत् । इदानींयावत् कलाकाराणां कृते स्त्रीणां शरीरमभ्यर्थनायाः, प्रशंसायाः, करुणायाश्च वा विषयोऽभूत् । तद्धि पिकासोमहाशयस्य कृते नन्वेको नग्नो मानवीयः साक्षात्कारोऽभूत् । यथैतस्मिन् भग्नदर्पणे मनुष्याकृतिः परश्शतेषु खण्डेषु दृश्यते तथैव सा स्त्रीणां शरीरं खण्डेषु विभक्तं विकेन्द्रितं चासीत् । ताश्च स्त्रियः सर्वविभाजने सम्पूर्णा आसन् स्वसम्पूर्णतायां च विभक्ता अभूवन् । 'लदेमाजेलसद' 'अविनोन' इतीदं चित्रं विलोक्य पिकासोमहाशयस्य समकालीनश्चित्रकार एकष्टिप्पणीं कृतवान् यद्धि 'पिकासो पैट्रोलतैलं पिबति तथा चाग्निमुद्गिरति ।' इति ।

तदानीं 'लदमाजेलस' 'अविनोन' कलायामेको नवीनारम्भोऽभूत् परन्तु पिकासोमहोदयस्य कृते प्रत्येकः प्रारम्भः खल्वेकोऽन्तोऽपि च समसिद्धयत् । स कदापि स्वात्मनो रूढीपरम्पराया रेखामार्गं न निर्ममे । यदासौऽत्रभूद्यद्धि रूढीपरम्पराया रेखा भवितुमारभत, तदाऽन्यमेकं मार्गमाललम्बे । सन् १६०५ ई० वर्षतः १६१० पर्यन्तं स अफ्रीकादेशस्य मुखाकृतिभ्यः प्रेरणामाददानः पाश्चात्यं जगन्मनुष्यस्य नवीनयैकयाऽऽकृत्या परिचितं विदधे । सन् १६०६ वर्षे पिकासोमहाशयः सुविख्यातायाः कलाभिभाविकाया लेखिकायाश्च गर्ट्र स्टीनइत्याख्यायाश्चित्रमेकमारेखयद्यस्मिन् इबेरियाभूभागस्याकृतीनां सुस्पष्टो हि मुद्राङ्को वर्तते ।

कलायै पिकासोमहोदयस्य सर्वतो महद्योगदानं 'धनवादो' ऽस्ति, यस्य बीजानि 'लदेमाजेल्सद' 'अविनोन' इत्यस्मिन्नासन् । पुरातन्यां इस्पहानीशैल्यां तथा चादिमास्वफ्रीकीषु शैलीष्वाकृतीमां निर्माणानन्तरं पिकासोमहाशयस्य समक्षं सर्वतो महती समस्या सैषासीद्यद्धि चित्रायामात्मकं दृश्यं जगद् यामद्वयात्मके चित्रफलके कथमिवालेख्यं स्यादिति । पिकासो तथा तदनन्तरं जार्जबाकमहाशयश्च रूपाकाराणां विश्लेषणपद्धत्यामाधृतां धनवादिनीं शैलीमुत्पाद्य समस्यां तामिमां समादधाते । धनवाद-शैल्याश्चित्राणि यथार्थस्यैकस्मिन् पक्षेऽपरं पक्षमुद्धृत्याकाराणां विडम्बनामेकां जनयन्ति । पिकासो महोदयोऽस्यां शैल्यां केवलं 'स्थिर-संसारस्यैव' व्याख्यां न चकार वरञ्च व्यक्तीश्चापि विश्लेषिता विदधे । एषु चित्रेषु प्रमुखानि सन्ति 'डी. एच. काहनवीलरस्य व्यक्ति चित्रम्' (१९१०) 'फर्नण्डस्याकृतिः' (१९०९)- 'स्त्रिया मुखाकृतिः' (१९०९) तथा 'एम्ब्रोज बोलार्डस्य व्यक्तिगतं चित्रम्' (१९१०) ।

धनवादस्तावदेकस्यैव वस्तुनोऽनेकाभिदृष्टिभिर्दर्शनस्य प्रयोगोऽभूत्-प्रकारान्तरेण स (धनवादः) वस्तुनस्तस्य सम्पूर्णत्वे दर्शनस्य प्रयत्नोऽभूत् ।

सन् १९०१ वर्षतः प्रारभ्य सन् १९७३ वर्षपर्यन्तं पिकासोमहोदयस्य ७२ वर्षात्मको रचनाकालो विंशतिशताब्द्याः समग्राणामन्तर्विरोधानामविच्छिन्नाऽभिव्यक्तिरास्ते । विपञ्ची, स्त्रीः, वारवध्वः, आकृतयः, महोक्षः, वनेचराः, अश्वः, हत्या, प्रणयः, दर्पः, मिथुनम्, युद्धम्, शांतिः, भयम्, करुणालास्यम्, आतङ्कः, कपोतः, कलशः, एकाकित्वम्, पशुत्वमित्यादि किमपि चैतादृशं नास्ति यद्धि पिकासोमहाशयेन चित्रितं न स्यात् । मनुष्यस्य प्रायेण प्रत्येकं मनोभावं, प्रत्येकां चाकाङ्क्षां पिकासोमहोदयोऽपूर्वया विविधतया प्रास्तवीत् । नहि कोऽपि च कलाकारो वर्णानामेतावन्तं विविधमुपयोगं चक्रे यावन्तं पिकासोमहाशयः । इदं नास्त्येवाकारणं यद्धि पिकासोमहोदयस्य रचनाकालं पृथक्-पृथक् समये भिन्न-भिन्न वर्णानां प्रयोगाधारे विभिन्नेषु वर्णयुगेषु विभज्य विलोकितोऽस्ति ।

'गुरानिका' इत्याख्यस्य चित्रस्य विषये सैषा प्रसिद्धिरास्ते यद्द्वितीयमहायुद्धस्य समये यदा फ्रांसदेशस्यानेकेषु विभागेषु नात्सी शर्मण्यदेशस्याधिकारोऽभूत्तदा केचन नात्सीसैनिका 'गुरानिका-चित्रं द्रष्टुमिच्छां प्राचीकटन् । तच्चित्रस्यावलोकनानन्तरं ते सैनिकाः पिकासोमहाशयमपृच्छन्, 'अप्येषा भवतः कृतिः ?' पिकासो प्रत्युदतरत् 'नहि, सैषा भवतां कृतिरास्ते ।' इति ।

अनेकेष्वर्थेषु 'गुरानिका' इति चित्रं, पिकासोमहाशयस्य सर्वाभ्योऽपि रचनाभ्यः प्रतिनिधीभूता रचना विद्यते । इस्पहानी-गृहयुद्धस्य समये स्पेनदेशस्य गुरानिकाख्ये खल्वेकस्मिन् ग्रामे प्रजानां हननेनोत्पीडनेन प्रेरिता, १९३७ ई. वर्षे विरचिता सैषा कृति विंशतिशताब्द्या बर्बरतामामानवीयतां च तत्समग्रताया मुपस्थापयति । विशालेऽस्मिंश्चित्रे मनुष्यस्य त्रासः किलेतिवृत्तात्मकशैल्या व्यक्तो न कृत्वा बर्बरताया हत्यायाश्च समकालीनैः प्रतीकैर्व्यक्तीकृतोऽस्ति । चित्रस्यास्य मध्यभागे मरणोन्मुखोऽश्वो, यो हि स्वपीडाया वेदनार्दितः करुणकरुणमाक्रोशन् प्रदर्शितोऽस्ति । चित्रस्य वामपार्श्वे मृतस्यैकस्य सैनिकस्य हस्ते भग्नखड्गस्य खण्डितः त्सरुरास्ते तथा समीप एवैका माता स्वस्य मृतस्य शिशोः शरीरेऽवनता क्रन्दन्ती वर्तते । चित्रस्य सर्वोपरिभागे महोक्षोऽस्ति निर्विकारो योहि विजयो-

न्मत्तो विद्यते । स च पिकासोमहाशयस्य मतानुसारमन्धत्वस्यान्धकारस्य च प्रतीकमास्ते । कश्चनांग्ल: कलासमीक्षको जानबर्जरनामाऽलिखत् "अस्मिंश्चित्रेपिकासोमहोदयो वास्तविकीं घटनामारेखितुं न प्रायतत । चित्रेऽस्मिन्न किमपि नगरमास्ते, न विमानं, न विस्फोटास्त्रं, न तिथिर्वर्षं दिनं वा शताब्द्या: सन्दर्भो वर्तते । न च तत्रैतन्निर्देष्टुं प्रयत्नोऽकारि यद्धि सैषा घटना स्पेनदेशस्य कस्मिन् भागेऽघटतेति । नतु तत्र बन्दीकृता: शत्रव: सन्ति नच नायक: । तदापुन: क्व नु खलु विरोधोऽस्ति ? तत् सर्वं तत्र चित्रेऽस्तियत्तेषुशरीरेष्वघटत-हस्तेऽस्ति, पदतलयोरस्ति, घोटकस्य जिह्वायामास्ते, मातु: स्तनेऽस्ति, तथा च लम्बमानेषु नेत्रेषु वर्तते ।"

मनुष्यं प्रति मनुष्यस्यामानवीयत्वं पिकासोमहाशयस्य चिन्ताया मुख्यो विषयोऽभूत् । सम्भवतस्तस्य कम्यूनिष्टत्वादेव तस्यासौ धारणासीद्यद्धि साम्यवाद: किलैकं मानवीयं विकल्पं प्रस्तौति । तस्येयमाशा कियत्पर्यन्तं पूर्णतामगादिति कथनं कठिनमास्ते, यत: स विषयेऽस्मिन्नतीव स्वल्पाष्टिप्पणी: कृतवान् । एतावत्पर्यन्तं, यदातस्य निकटतमा: सुहृदो विषयमिममधिकृत्य वादविवादमकार्षुस्तदापि स किमपि वक्तुं नोदसहत । बहुभ्यो वर्षेभ्य: पूर्वं स स्वस्य द्वावभिनेतारौ सुहृदौ सिमनसिनोरे तथा यूमोतां इत्याख्यौ–स्वनिवासस्थाने भोजनार्थमामन्त्रितवान् । तौ द्वावप्यभिनेतारौ साम्यवादमधिकृत्य भीषणं विवादमकुरुताम् । पिकासो महोदयो विवादकाले नन्वेकं शब्दमपि नोऽब्रूत केवलं सावधानं श्रृण्वन् तस्थौ ।

विश्वविख्यातस्यास्य महाचित्रकलाकारस्य पाब्लो पिकासो महोदयस्य प्रशंसकानां संख्या सदा सर्वदा लक्षाधिका समभूत् । सत्यप्येवं तेन सह साक्षात्कारकराणां संख्या सदैव सीमितासीत् । प्रशंसकानां, तत्साक्षात्कारकराणां च कृते पिकासो महाशयस्य भवनद्वाराणि सदैव पिहितानि समतिष्ठन् । पिकासो स्वयं कथयति स्म, 'मया साकं साक्षात्कारमिच्छतां जनानां संख्या बतेयदधिकास्ते, यदि चाहं प्रत्येकेन मिनटद्वयमपि मिलेयं चेत्तदापि मध्यरात्र पर्यन्तं समापयितुं न शक्नुयाम् ।'

पिकासो महोदयस्य मित्राणि मुख्यरूपेण लेखका:, कवयस्तथा चाभिनेतारोऽभूवन् । पिकासो नानाप्रणयलीला अकरोत्, सन्ततीश्चोदपादयद्, विवाहविच्छेदांश्चाकार्षीत्, कलहांश्चाकरोत् । यावद्विविध: पिकासो महाशयस्य चित्ररचनासंसारोऽस्ति तावदेव विविधं तज्जीवनमास्ते । तस्य समस्तं जीवनमनेकैरुत्थान-पतनै: परिपूर्णमासीत् । स्वस्य प्रारम्भिके जीवने तु तेन महान् हि सङ्घर्ष: कर्त्तव्यतामापतित: । सह्यतां नीतानां स्वकष्टानां, धैर्य–साहसादिगुणानां स: समुचितं पुरस्कारमपि लेभे, परन्तु प्रारम्भिकस्य जीवनस्य सङ्घर्षा विपर्ययाश्च तन्मनसि, मस्तिष्के च यं प्रभावमर्पयामासु: स प्रभाव: सम्भवतस्तस्मिन् जीवनान्तपर्यन्तं संतस्थे । सम्भवतस्तदेतदेव हि कारणमासीद्यद्धि पिकासो महाशयो बहुषु प्राचीनेष्वन्धविश्वासेषु, परम्पराप्राप्तासु रूढीषु, मान्यतासु विश्वासमादधे । विश्वासमादधे–इति कथनमनुचितमिव स्याद्वरञ्च स तत्परिपालनमपि सर्वांशत: करोतिस्म । अथैतद्वक्तुं शक्यते यत् पिकासो महाशयस्यान्धविश्वासेष्वन्धभक्तिरासीदिति ।

कश्चनैक: फ्रांसदेशीय: पत्रकार: पिकासोमहोदयेन सह साक्षात्कारानन्तरमलेखीद्यत् स: (पिकासो) स्वस्य चित्राधारस्य मुखं सदैवैकस्यामेव दिशि संस्थापयतिस्म । यदा स चित्रारेखनं कुर्वाणो

भवतिस्म- तदा तत्कक्षाभ्यन्तरं प्रवेशस्यानुमतिः कस्यापि कृते न प्रदीयते स्म ।

पाब्लोपिकासोमहोदयः सैद्धान्तिकरूपेण—ईश्वरे विश्वासं नाधत्ते स्म, परन्तु सोऽवाञ्छद्यदन्ये जनास्तस्य कृते ईश्वरं प्रार्थयन्तु । अस्य कारणे पृष्टे स एकदा समुदतरत् 'यदि कश्चनान्यस्य कृते प्रार्थनां करोति तदावश्यमेव हि तस्य लाभो भवति ।' अनेनैतदवगन्तुं शक्यते यत् स ईश्वरे पूर्णतयाऽऽस्थाहीनो न बभूवेति ।

पिकासो महोदयस्य विषये नन्वेतदपि प्रसिद्धमास्ते यत्तत्समक्षं यदि कोऽपि हैटसंज्ञकं शिरस्त्राण मितस्ततो निक्षिपति स्म तदा स भृशं प्रकुप्यतिस्म। विषयेऽत्र तस्य कथनमासीद्यदित्थं शिरस्त्राणस्य प्रक्षेपादेकवर्षाभ्यन्तरं गृहे कस्यचिन्मृत्युर्भवतीति ।

पिकासो महाशयस्य सम्बन्धविच्छेदात्परित्यक्ता' पत्नी फ्रांस्वा स्वस्य 'पिकासोमहोदयेन सह जीवनम्' इत्याख्ये पुस्तके घटनाया एकस्या उल्लेखमित्थं कृतवती 'अथैकदा वयं सर्वे गृहसदस्याः कक्षमध्यासीना आस्म । विनोदहासपरिहासाः प्रवर्तमाना आसन् । असावधानतया मम हस्तः समीपे संस्थिते लघुन्येकस्मिन्नातपत्रेऽपतत् । तच्चातपत्रमजानन्त्या मयोद्घाटितम् । ततस्तु पुनरापदिव सहसाऽऽपपात । पिकासोमहोदयस्य कथनादस्माभिः सर्वैः स्वहस्तस्य मध्यमायामङ्गुलौ तर्जनीं समारोप्य 'लगातोलगातो' इत्युचारणपरैः स्वबाहू समान्दोलयद्भिश्च सम्पूर्णः कक्षः त्रिःप्रदक्षिणीकर्तव्यो बभूव । एवं कृत एव पिकासो प्रशांतोऽभूत् ।' भोजनसमये भोजनोपयुक्ते काष्ठफलके सर्वेऽपि च रोटिकाखण्डा ऊर्ध्वमुखाः स्थापनीया भवन्तिस्म,यतः पिकासोमहोदयस्यैषा धारणासीद्यदन्यथाचरणात् परिवारो विपद्ग्रस्तो भवितुमर्हतीति ।

स्वस्यैवंविधैरन्धविश्वासैः पिकासोमहाशयः क्षौरकर्मणि केशकर्त्तनाद्बिभेतिस्म । यतः सैषा प्राचीनैका यूरोपदेशीया मान्यतास्ते यद्धि यदि भवान् कमप्यन्यं जनं स्ववशे कर्तुमिच्छति चेत्तदा तस्य कर्तिता बाला नखाश्च प्राप्यन्ताम् । एतदपि च कथ्यते यत्तदेतत् केशनखं विनाश्येत तदा शत्रोरपि मृत्युर्भवितुमर्हतीति । तमेतमन्धविश्वासं परिपालयन्तो जनाः स्वकीयं कर्तितं नखकेशं प्रति सावधानास्तिष्ठन्ति तथा च स्वात्मनो नखकेशं पूर्णतोनाशयन्ति । पिकासोमहोदयोऽपि चास्मादेव भयात्क्षौरं नाकारयत् । 'न कदाचिन्मम नखकेशादिकं शत्रुरपहरेत् ।' इत्याशङ्कया स कदापि कस्यापि च नापितस्य क्षौरगृहं न गच्छतिस्म। मासान् यावत्तस्य केशा विवर्धन्तेस्म । यथा यथा तस्य केशा वृद्धि गच्छन्ति स्म तथा तथा तस्य चिन्तापि वर्धते स्म । अन्ततः सः स्वयमेवहि तानिमान् केशानपाकर्तुं स्वपत्नीं कथयतिस्म । यदि च तत्पत्नी कर्मण्यत्र विलम्बते स्म, तदा सः स्वयमेव दर्पणस्य पुरत उपविशतिस्म, स्वकेशान् स्वयमेव कृन्ततिस्म ।

अथान्धविश्वासैरेभिः पिकासोमहाशयं लोका दुस्स्वभावं कथयन्ति स्म । कश्चिदेक आलोचकस्तु तमर्द्धविक्षिप्तमपि चाकथयत् । परन्तु पिकासो स्वयमेतत्सर्वमुपेक्षतेस्म यत् कोऽपि जनस्तद्विषये किंकथयति किंवाकिंवदति । स हि या मान्यता परिपालयति स्म तदर्थं तु मनोवैज्ञानिका एवान्विष्य वक्तुं पारयन्ते परन्तु तेनैतावत्तु स्पष्टा भवति, सोऽधुन तनोभूत्वापि प्राचीनानां रूढीनां मोहं परित्यक्तुं न शशाकेति ।

पिकासोमहोदयस्य पुत्रो यदापि तत्समीपमागच्छति स्म तदा पिकासो तद्गमनात् पूर्वमेवतस्य किमपि वस्तु स्वसविधे रक्षतिस्म, यद्यपि तानि

सर्वाणि वस्तूनि स पश्चात् परावर्तयति स्म। एकदा स स्वपुत्रस्य विवर्णवर्णं बर्षाकञ्चुकं स्व-समीपेऽरक्षत् । यादवस्त्राणि. उष्णीषं, गलबन्धनानि तु स प्रायेण रक्षति स्म । कदाचित्तन्मनसि युवा-वस्थायां पुनः प्राप्तेरिच्छासक्रियासीत् ।

८ अप्रेल १९७३ दिनाङ्के फ्रांसदेशस्य समुद्रतटे, कान्ससमीपं मगिन्संस्थितं स्वनिवास-स्थाने, यत्रविगतेषु बहुषुवर्षेषु निवसन्नासीत्, विंशत्याः शताब्द्या महत्तमः कलाकारो देहंत्यक्त्वा स्वर्गं जगाम । गतवर्षे निखिलविश्वस्य कला-प्रणयिनः पिकासोमहोदस्यैकनवतितमं जन्मग्रन्थि-महोत्सवमुदयापयन्; लघुमहत्यः सर्वाश्चापि पत्रिकाः पिकासोविशेषाङ्कान् प्राकाशयन्; यूरोपा-मरीकादेशानां कलावीथ्यः पिकासोमहोदयस्य सुलभानां दुर्लभानांच चित्राणां प्रदर्शिनीः समायो-जयन् । पैरिसनगरस्य प्रख्याते संग्रहालये प्रथमवार-मेकस्य कलाकारस्य नामाङ्किताया वीथ्याः स्थाप-नाऽक्रियत । मानवसभ्यताया इतिहासे कदापि कस्यापि च कलाकारस्यैतावत्कीर्तिर्न दिदीपे यावत् पिकासो महोदयस्य । पिकासोमहाशयस्य समग्रायाः सम्पत्तेर्मूल्यमष्टार्बुदमुद्राप्रायमनुमितम् । तावती सम्पद्यूरोपभूभागस्यानेकेषां लघु-लघूनां देशानां वार्षिकायव्ययतोऽपि बह्वधिकास्ते । प्रतिभादृष्ट्-यापि पिकासोमहोदयस्य तुलना मध्ययुगीनाभ्यां केवलं द्वाभ्यामेव कलाकाराभ्यां कर्तुं शक्यते; लियोनार्दोदा विचीत्यनेन तथा च माइकेल रांजोलो-इत्यनेन । शक्तेस्तथोर्जाया दृशा पिकासोमहोदयस्य प्रतिभा कल्पनातीतास्ते । स्वत्रिकाशसाधनार्थं स स्वजीवनकाले तावत् कार्यं चक्रे यावत् साधारण-तया कलाकाराणां शतं करोति । सहि पञ्चदश-सहस्रप्रायाणि चित्राणि रचयामास, लक्षसंख्यक-प्रायाः प्रतिकृतीस्तथा च सार्धत्रिसहस्रप्रायाणि पुस्तकाङ्कणानि तथा त्रिसहस्रमिता मूर्तिकृतीश्च निर्ममे । एभ्योऽतिरिक्तं परः सहस्रसंख्यकानि चित्राणि मूर्तिकृतयश्च तस्य स्वकीये संग्रहालये वर्तन्ते ।

आयामिन्यः शताब्दयः पिकासोमहाशयं वास्तविकपुरुषरूपं न वरञ्चांग्लकवि विलयम शेक्सपीयरमिवैकं काल्पनिकं व्यक्तिविशेषं द्रक्ष्यन्ति । तदेतत् स्वाभाविकमपि वर्तते । तदेतद्विश्वसितुं कठिनमास्ते यत् पिकासोसदृशः कश्चन पुरुषो-भवितुमर्हतीति । एक कलासमीक्षकः पिकासो महाशयं 'मीनातोर' (ग्रीकदेशीयः पिशाचविशेषो यस्याकृतिर्महोक्षस्येव तथा शरीरं मनुष्यस्येवासीत्) इत्युक्त्वा समबोधयत् तत् खलु स्थान एव ।

महोक्षः खलु शक्तिः प्रतीकमास्ते-आक्रामिकी-शक्तेः, अहं भावस्य, धर्षणाया, बर्बरतायाश्च प्रतीक-मास्ते–तदिदमाकस्मिकं नास्ते यन्महोक्ष-युद्धं' पिकासोमहाशयस्य प्रियविषयोऽभूत् । स्वकीये व्यक्तिगते जीवनेऽपि पिकासोमहोदयरयाभिरुचि-र्महोक्ष–युद्धदर्शनस्य सततं तस्थौ ।

एवं विधस्य विश्वविख्यातस्य पाब्लो पिकासो महाशयस्य ८ अप्रेल सन् १९७३ ई. दिने फ्रांसदेशस्य समुद्रतटे, कान्ससमीपे मगिन्सस्थिते स्वनिवासस्थाने देहान्तोऽभूद्यत्र स विगतानि कानि-चिद् वर्षाणि निवसन्नासीत् । इत्थंभूतस्य जगत्प्रसि-द्धस्य महाकलाकारस्यावसानात् कलाजगतो महती हि क्षतिः समजनि । वयमत्र तस्य संदगत-स्यात्मिकीं शांति परमात्मनः कामयामहे ।

—o—

भारतीय संस्कृतिः

श्री जगन्नाथो वेदालंकारः, श्री अरविन्दाश्रमम्, पाण्डिचेरी

(गोरीमेडू (पाण्डिचेरी) स्थिते केन्द्रीय धन्वन्तरिमहाविद्यालये स्वाधीनता रजत-जयन्ती समारोहे श्राविता)

प्रभोः प्रियो भारतदेश एष समस्तभू–मौलि–ललामभूतः,
यस्मात् पृथिव्यां प्रथिताऽखिलायां सत्सभ्यता संस्कृतिरद्वितीया,
प्रकाशिता या प्रभुणाऽस्ति वेदे सुभव्यसृष्टेः प्रथमे प्रभाते,
यस्याः प्रतिष्ठा च ऋतं च सत्यं विश्वात्ममूलं भुवनैक्यतत्त्वम्,

त्यागश्च यागश्च तथा च यज्ञो योगश्च तन्मूलक–दिव्यभोगः,
तपश्च तेजो बलवीर्यमोजो वज्रोपमं वीरभुजासु चोर्जः,
भक्तिश्च शक्ति विषयेष्वसक्तिः समस्तलोकस्य हितानुरक्तिः,
निष्काम–देवार्पित–कर्मरीतिः कृतस्य कार्यस्य फलेष्वसक्तिः,

ज्ञानं तथा ध्यानमथावदानं धनं सधर्मं च सुपात्रदानम्,
सब्रह्मचर्यं गुरुगेहवासो विद्याऽनवद्या च कलाकलापः।
एतै र्गुणैः संवलिता सुदिव्या कुतोऽद्य सा संस्कृतिरार्यजातेः,
यया प्रसूता जगति प्रसिद्धा ब्रह्मर्षिराजर्षि–महर्षिवर्याः ?

मान्धातृदेवोऽथ च रन्तिदेवः, पुण्यप्रजश्चाश्वपतिस्तथैव,
यो घोषयामास हि साधिकारं स्वादर्शराज्यस्थितिमेवमग्र्याम्–
'स्तेनो न मे राज्यवरे कदर्यो नाभक्ष्यसेवी न च मद्यपोऽपि,
नाऽनाहिताग्निर्न हि चाप्यविद्वान् स्वैरी न च स्वैरिजनोपभोग्या।'

सत्यो हरिश्चन्द्रनृपस्तथैव युधिष्ठिरश्चापि स धर्मराजः,
सम्राडशोको जनको विदेहो मुनिर्वसिष्ठोऽपि च याज्ञवल्क्यः,
रामश्च कृष्णश्च स जामदग्न्यो बुद्धो महावीर–तपस्विसम्राट्,
स रामकृष्णश्च तथा विवेकानन्दोऽप्यसौ श्रीअरविन्ददेवः,

यत्राऽभवन् राष्ट्रवरेऽवतारा विभूतयो वाप्यतिभव्यभव्याः,
हा हन्त कीदृग्दयनीयतेयं संदृश्यते सर्वदिशासु तस्य,–
भ्रष्टाचारो नप्तृवादस्तथैवाऽनाचारोऽत्याचार एवापि दीने।
रोधस्यार्थे सन्ततेश्चापि हन्त क्लैव्ये दीक्षा हा दुराचारवृद्धिः!

चौर्याऽऽनीतैर्वस्तुभिर्वैश्यवृत्तिर्व्यापारो ह्या तस्करीयस्तथैव,
दस्यो. कार्यं चान्तरिक्षेऽप्यबाधं धौर्त्यं शाठ्यं छद्मना वंचनं च,
शत्रोर्बन्धो र्वाऽपहार: प्रगल्भस्तन्मोक्षार्थं वित्तलब्धे: पणश्च,
खाद्याभावश्शासकीयाऽव्यवस्था भोज्ये पेयेऽपथ्यसम्मिश्रणं च ।।

तम: प्रगाढं तदिदं किमर्थकं कुसंकरस्यास्य च किं प्रयोजनम्?
घना निशेयं किमुषा–निर्दशिका कोप: कले: सत्ययुगोदयार्थक ?
सज्जास्वरूपाऽखिल-दुर्व्यवस्था ह्याध्यात्मिकक्रान्तिकृते किलैषा ।
प्रतीक्षते क्रान्तिरभूतपूर्वा सा देवनिर्दिष्ट-महामुहूर्तम् ।।

मत्यां च तस्यां सकलोऽन्धकार: स्वर्णप्रकाशे परिवृत्तिमीयात् ।
धर्मश्चतुष्पाद् नवदिव्यसृष्टिरन्धात्मकानामपि गोचरीस्यात् ।।
'सा संस्कृति: प्रथमा विश्ववारा' पुनश्च विश्वे भुवने विराजेत् ।
अत्रान्तरे श्रद्दधता जनेन कार्यं सहर्षं निजयोगदानम् ।।

स्वामिन् समाविर्भव पार्थसारथे मार्गं च सन्दर्शय मर्त्यजातये ।
रथं च संचालय मानवात्मनो जयं च संसाधय सत्यसंगरे ।।
'शृण्वन्तु विश्वे अमृतस्य पुत्रा.' द्यौर्न. पितास्ते पृथिवी च माता ।
प्रजापति र्नोऽस्ति पितामहश्च वयं च सर्वे भुवि बान्धवा: स्म. ।।

ईशा वास्यमिदं चराचरमयं ब्रह्माण्डमत्यद्भुतम्,
अन्तर्वासितया च तस्य हि नृणां नित्यैक्यमाध्यात्मिकम् ।
तस्यैकस्य पितुश्च सन्तततया सर्वे वयं बान्धवा:,
सृष्टा तेन च या विशाल-वसुधा सास्मत्कुटुम्बं विराट् ।।

वीक्षन्तां सकला जना भुवि सदा मित्रस्य मां चक्षुषा,
मित्रस्यैव च चक्षुषाऽहमपि तान् वीक्षे विशालात्मना ।
वीक्षन्तां हि परस्परं सखितया सर्वाणि भूतानि च,
विश्वस्यास्तु च बन्धुता दृढतरा मैत्र्याऽनया सत्यया ।।

संगच्छन्तां संवदन्तां च सर्वे
संसेवन्तां सामरस्यं सदैव ।
अन्योन्यस्यान्तस्तलं संविदन्त:
संवर्तेरन् देववद् भारतीया: ।।

—o—

महर्षिं दयानन्दमाप्तं नमामः

कवयिता—आचार्यधर्मदेवो विद्यामार्तण्डः, (देवमुनिर्वानप्रस्थः)
आनन्दकुटीरम्, ज्वालापुरम्

ध्रुवं वेदधर्मप्रचारे सुनिष्ठं, ध्रुवे देवदेवेश्वरे सुप्रतिष्ठम् ।
बुधं निर्भयं सत्यकारुण्यरूपं महर्षिं दयानन्दमाप्तं नमामः ।।

सदाध्येयमिदं परं, ब्रह्म सत्यं, न मूर्त्यादिपूजा कदापीह कार्या ।
समस्तान् जनान् बोधयन्तं प्रशान्तं, महर्षिं दयानन्दमाप्तं नमामः।।

न वेदादृते मुक्तिमार्गस्वरूपं, न धर्मस्य वा शक्यते ज्ञानमाप्तुम् ।
परब्रह्मणः श्वासभूतान् हि वेदान्, वदन्तं दयानन्दमाप्तं नमामः ।।

समस्ता जनाः प्रेमदृष्ट्यावलोक्याः, घृणा नैव कार्या न दर्पः कदाचित् ।
समस्तान् जनान् मेलयन्तं विशुद्धं, महर्षिदयानन्दमाप्तं नमामः ।।

सदा धर्ममार्गोऽवलम्ब्यः समस्तैः, न सत्यात्परं धर्ममाहुर्महान्तः ।
तदर्थं समस्तानि कष्टानि सोढुं, दिशन्तं दयानन्दमाप्तं नमामः ।

विषं येन पीतं सहर्षं न सत्यं, कदाप्युज्झितं योगिवर्येण येन ।
बलिर्येन दत्तः स्वतन्त्रस्तथान्ते, महर्षिं दयानन्दमाप्तं नमामः ।।

"विद्रोही"

(श्रीकाजीनजरुलइस्लामविरचितबङ्गलाकविताया: संस्कृतानुवाद:)

(मुक्तं वृत्तम्)

वद वीर !
वद "उन्नतं मम शिर:"
"मम शिर: दृष्ट्वा हिमाद्रिशिखरं नतशिर:"
वद वीर !
वद
"महाविश्वस्य महाकाशं पाटयित्वा
चन्द्रसूर्यग्रहतारकगणान् मुक्त्वा
भूलोकद्युलोकगोलोकान् भित्त्वा
ब्रह्मण आसनं दिवं छित्त्वा
उत्थितोऽस्मि ।
अहं विश्वविधात्याश्चिरविस्मय:
मम ललाटे रुद्र: भगवान् इव ज्वलति
जयश्रिय: दीप्त: राजराजतिलक: ।"
वद वीर !
वद
"चिरमुन्नतं मम शिर:" ।।१।।

अहं चिरदुर्दम: दुर्विनीत: नृशंस:
अहं महाप्रलयस्य नटराज: अहं वात्याचक्रम्
अहं ध्वंस:, महाभयम् अहं पृथिव्या अभिशाप:
अहं दुर्वार: अहं भेदयित्वा सर्वं चूर्णयामि ।
अहम् अनियम: अहम् उच्छृङ्खल:
अहं सर्वं बन्धनं सर्वं नियमं सर्वं न्यायं
सर्वां शृङ्खलाम्
विदलयामि
अहं धूर्जटि:, अहम् अकाले प्रचण्ड: प्रभञ्जन:
अहं विद्रोही, अहं विश्वविधात्या विद्रोही सुत:
वद वीर !
वद
"चिरम् उन्नतं मम शिर:" ।।२।।

अहं झञ्झा, अहं घूर्णवायु:
अहं पथसम्मुखं यं प्राप्नोमि तं चूर्णयामि ।
अहं नृत्यप्रमत्तं छन्द:
अहम् आत्मन: तरवारौ नृत्यामि ।
अहं मुक्तजीवनानन्द:
अहं हम्मीरराग:, अहं छायानट:
अहं हिन्दोलराग:
अहं चलचञ्चल:
पथि गच्छन् स्थित्वा, प्रदीप्य लुप्ये ।
अहं चपलाचपल: हिन्दोल: ।
मह्यं यदा यद् रोचते तत्करोमि ।
शत्रून् आलिङ्गामि । मृत्योर्हस्तं गृह्णामि ।।३।।
अहम् उन्माद:, अहं झञ्झा ।
अहम् इन्द्राणीसुत: ।
मम हस्ते चन्द्र: भाले सूर्य: ।
मम एकस्मिन् हस्ते वक्रा वंशी
अपरस्मिन् हस्ते रणतूर्य:
अहं व्यथावारिधे: मन्थनविषं पीत्वा
नीलकण्ठोऽस्मि सञ्जात: ।
अहं व्योमकेश:
गङ्गाधारां केशबन्धने धारयामि ।
वद वीर !
"चिरमुन्नतं मम शिर:" ।।४।।

अहं कुमार्या: मुक्तवेणी ।
अहं तन्वीनयने वह्नि: ।
अहं षोडशवर्षीयाया हृदयसरसिजस्य उद्दामप्रेम ।
अहं धन्य:
अहम् उदासिन्या उन्मनस्कं मन: ।
अहं विधवाया: क्रन्दनश्वास: ।
अहं हताशस्य हाहाकार: ।

अहं सर्वेषां पथिकानां गृहवियोगव्यथा ।
अहम् अवमानितानां मर्मवेदना ।
अहं विषज्वाला ।
अहं वियोगिन्या हृदयस्य आलोडनम् ।
अहम् अभिमानिचिरक्षुब्धहृदयस्य कातरता ।
सुनिविडव्यथा ।
अहं चुम्बनस्य गुप्तं कम्पनम् ।
अहं कुमार्याः प्रथमस्पर्शस्य स्पन्दनम् ।
अहं गुप्तप्रियस्य अभिलाषः
छलेन पुनः पुनः पश्यामि ।
अहं चपलबालायाः प्रणयः ।
तस्याः कङ्कणस्य झङ्कारः ।।५।।

अहं चिरशिशुः चिरकिशोरः ।
अहं यौवनभीतायाः पल्लीबालाया अञ्चलम् ।
अहं कञ्चुकी अहं प्रच्छन्नपटः ।
अहम् उत्तरवायुः, मलयानिलः
उदासी पूर्ववायुः ।
अहं पथिककवेः गभीररागिणी ।
अहं वेणुवीणागीतं गानम् ।
अहम् आकुलनिदाघतृष्णा ।
अहं रौद्ररुद्ररविः ।
अहं मरुस्थलनिर्झरझर्झरम्,
श्यामकालिमा, छायाछविः ।
अहं तुरीयानन्दे लीनः गच्छामि ।
कीदृश उन्मादः ?
अहम् उन्मादः ।
अहं सहसा आत्मानम् अभिजानामि ।
मम सर्वे बन्धा उन्मुक्ताः ।
अहम् उत्थानम्, अहं पतनम् ।
अहम अचेतनचित्ते चेतनः ।
अहं विश्वतोरणे वैजयन्ती ।
अहं मानवविजयकेतनम् ।
उन्मुक्तवात्याया इव करतालं ददतः
धावतः मम करतले
द्यावापृथिवी तिष्ठतः ।
"ताजी"–"बुर्राक"–"उच्चैःश्रवः" नामानः
अश्वा मम वाहनानि
ये सोत्साहं ह्रेषारवं कुर्वन्तः चलन्ति ।।६।।

अहं वासुकेः फणां संश्लिष्य धारयामि ।
"जिब्राइल"–नाम्नः स्वर्गीयदूतस्य
प्रज्वलितं पक्षम् आवृत्य सन्धारयामि ।
अहं देवशिशुः, अहं चञ्चलः ।
अहं धृष्टः, अहं विश्वमातुः अञ्चलम्
दन्तैः छिद्रयामि ।
"आर्फियस"स्य वंशी अहं महासागरं
स्वापयामि, सर्वं विश्वं स्वमधुरतानेन
निःस्पन्दं करोमि ।
अहं कृष्णस्य वंशी ।
यदा रोषेण महाकाशे धावामि
तदा सप्तसु नरकेषु स्तब्धता
आपद्यते, अन्धकारो भवति ।
अहं निखिलविश्वव्यापकः
विद्रोही ।।७।।

अहं मृण्मयः अहं चिन्मयः
अहम् अजरः, अमरः, अक्षयः
अहमव्ययः ।
अहं मानवः अहं दानवः ।
अहं देवतानां भयम् ।
अहं विश्वस्य चिरदुर्जयः ।
अहम् ईश्वरः, अहं जगदीश्वरः ।
अहं पुरुषोत्तमः, अहं सत्यम्
अहं स्वर्ग-पाताल-मर्त्यलोकेषु
नृत्यन् मथन् भ्राम्यामि ।
अहम् उन्मादः, अहम् उन्मादः
अहं आत्मानम् अभिजानामि,
अद्य मम सर्वे बन्धा उन्मुक्ताः ।।८।।

अहं परशुरामस्य कठोर: कुठार:
विश्वं निःक्षत्रं करिष्यामि ।
शान्ताम् उदारां शान्तिम् आनेष्यामि ।
अहं बलरामस्कन्धे हलः ।
अहं नवसृष्टेः महानन्दे पराधीनं
विश्वम् उन्मूल्य प्रक्षेप्स्यामि ।
अहं महाविद्रोही ।
यदा उत्पीडितानां क्रन्दनस्वर:
आकाशे वाते च न ध्वनिष्यति,
यदा च अत्याचारिणां खड्गकृपाणा:
रणे न रणिष्यन्ति तस्मिन्नेव दिने
विद्रोही अहं रणक्लान्त:
शान्त: भविष्यामि ॥९॥

अहं विद्रोही भृगु:
भगवत: वक्षसि पदचिह्नं
मुद्रयिष्यामि ।
अहं स्रष्टु: सूदनः ।
शोकतापदायकस्य विधे:
वक्षः भिन्नं करिष्यामि ।
अहं चिरविद्रोही वीर:
अहम् एकाकी संसाराद्
उत्थितोऽस्मि
चिरम् उन्नतं मम शिर: ॥१०॥

—अनुवादक: डा० राजमणिपाण्डेय:, कुरुक्षेत्रम् ।

जगन्नाथं वन्दे

कवयिता—आचार्यो धर्मदेवो विद्यामार्तण्डः (देवमुनिर्वानप्रस्थ:) आनन्दकुटीरम्, ज्वालापुरम्

यदीया लीलेयं, जगति विदिता मोदजननी,
विषादं या सर्वं, व्यपनुदति चानन्दकरणी ।
दयाया य: सिन्धु:, सकलमुनिवृन्देन विनुतो
जगन्नाथं वन्दे, निखिलभुवने व्याप्तमनिशम् ॥१

पिता यो मे पूर्ण:, सकलसुखदातास्ति जनक:
